# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ७ (C.E.- 2.3.5. Old) भारतीयकुण्डलीविज्ञानम् । | गुणा: - ७० |
| विषय: - ज्यौतिषशास्त्रम् | | |
| दिनाङ्क: - ११/१२/२०१८ | | समय: -०२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्यां करोतु ।** **( १० )**

(१) पंक्ति: स्वेष्टाद् भवेदग्रे पंक्त्यामिष्टं विशोधयेत् ।
तच्चालनमृणं ज्ञेयं व्यत्यये व्यत्ययं विदु: ॥

(२) खषडघ्नं भयातं भभोगोद्धृतं तत्खतर्कघ्नधिष्ण्येषुयुक्तं द्विनिघ्नम् ।
नवाप्तं शशी भागपूर्वस्तुभुक्ति: खखाभ्राष्टवेदाभभोगेन भक्ता: ॥

(३) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।
लब्धमंशादिनां शोध्यं योज्यं स्पष्टो भवेदग्रह: ॥

**प्रश्न: २ एकस्य सविस्तरं वर्णनं कुरुत ।** **( १० )**

(१) पञ्चाङ्गम्

(२) सोदाहरणम् इष्टकालसाधनम् ।

**द्वितीयान्विति:**

**प्रश्न: ३ कयोश्चित् द्वयो: सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) मेषादिगे सायन् भाग सूर्ये दिनार्धभा या पलभा भवेत्सा ।
त्रिष्ठा हतास्युर्दशभिर्भुजंगैर्दिग्भिश्चरार्धानिगुणोद्धृताऽन्त्या ॥

(२) त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते ।
मार्तण्डेन्द्वोरयुजिसमभे चन्द्रभान्वोश्च होरे ॥

(३) कुजयमजीवज्ञसिता: पञ्चेन्द्रियवसुमुनीन्द्रियांशानाम् ।
अयुजि युजि तु भे विपर्ययस्था: ॥

**प्रश्न: ४ एकस्य सविस्तरं वर्णनं कुरुत ।** **( १० )**

(१) षड्वर्गविचार: (२) लग्नानयनम् ।

**तृतीयान्विति:**

**प्रश्न: ५ कयोश्चित् द्वयो: सान्वयं व्याख्यां करोतु ।** **( १० )**

(१) शत्रु: मंदसितौ समश्चशशिजो मित्राणि शेषारवे:
तीक्ष्णांशुर्हिमरश्मिजश्चसुहृदौ शेषा: समा: शीतगो: ।

जीवेन्दूष्णकराः कुजस्य सुहृदोज्ञोऽरिः सितार्कीसमौ

मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥

(२) गजाभ्रभूमिर्निहता ग्रहाणां राश्यंशलिप्ताः खरसैस्तु तष्टाः ।

लिप्ता विलिप्तास्तुलवाः खरामैस्तष्टाः फलंचोपरियोजनीयम् ॥

(३) अजवृषमृगाङ्गनाकर्कि-मीन वणिजांशकेष्विनाद्युच्चाः ।

दशशिख्याष्टाविंशतितिथीन्द्रिय-त्रिनवविंशेषु ॥

**प्रश्नः ६ एकस्य सविस्तारं वर्णनं कुरुत ।** **( १० )**

(१) रेखाष्टकविचारः ।

(२) अष्टोत्तरीदशान्तर्दशासाधनम् ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु केवलं दशोत्तरं लिखन्तु ।** **( १० )**

(१) पञ्चाङ्गस्य अङ्गनामानि कानि ?

(२) अंतिमयोगस्य नाम किम् ?

(३) कति संवत्सराणि भवन्ति ?

(४) उत्तरगोलः कदा भवति ?

(५) मेषराशेः आङ्ग्लनाम किम् ?

(६) ‘पंक्तिः’ शब्दस्य को अर्थः ?

(७) भयात अर्थात् किम् ?

(८) पञ्चदशांशाः के ?

(९) षड्वर्गनामानि कानि ?

(१०) मेषराशिनवांशे मेषराशेः प्रारम्भः भवति वा न भवति ?

(११) जीवस्य मित्रग्रहाः के ?

(१२) रेखाष्टकविचारे कति अवस्थाः भवन्ति ?

(१३) क्षोणीपुत्रः अर्थात् कः ?

(१४) सूर्यस्य उच्चराश्यंशः कः ?

(१५) गुर्जरे कच्छसौराष्ट्रे अष्टोत्तरी व विंशोत्तरी दशाग्राह्यः ?

--००--